विषय-सूची

गुरुकुल-पत्रिका का वार्षिक मूल्य—

देश में - ४ रुपये विदेश में - ७ रुपये, एक प्रति ४० पैसे

ओ३म्

गुरुकुल-पत्रिका

[गुरुकुलकांगड़ीविश्वविद्यालयस्य मासिक पत्रिका]

पौष: २०३०, जनवरी १९७४, वर्षम्-२६, अङ्क: ५, पूर्णाङ्क: ४००

इदमकर्म नमो अभ्रियाय यः पूर्वीरन्वानोनवीति ।
बृहस्पतिः सहि गोभि सो अश्वैः सवोरेभिः सनृभिर्नो वयो धात् ॥

ऋ. १०।६८।१२

(अभ्रियाय) शक्ति व प्रकाश की वर्षा करने वाले बृहस्पति को (इदं) यह (नमः अकर्म) हमारा नमस्कार है। (यः) जो बृहस्पति (पूर्वीः) सनातन काल से चली आरही साधनाओं को (अनु) अनक्रम से (आनोनवीति) शिष्यों द्वारा बार २ स्तुति करवाता है और करता है। (सः हि बृहस्पतिः सगोभिः सो अश्वैः सवीरेभिः सनृभिः) वह बृहस्पति गौओं, अश्वों और वीरपुरुषों द्वारा (नः वयः) हमारी आयुओं अथवा सन्तति विस्तार को (धात्) धारण करावे ।

तद् देवानाँ देवतमाय कर्त्वमश्रथ्नन् दृढहाब्रदन्त वीडिता ।
उद् गा आजदभिनद् ब्रह्मणा बलमगूहत् तमो व्यचक्षयत् स्वः ॥

ऋ. २।२४।३

(देवानां देवतमाय) इन्द्रियादि देवों को देवतम बनाने के लिये बृहस्पति ने (तत् कर्त्वं) वह कर्म किया कि (दृढहा अश्रथ्नन्) दृढ़ पाप शिथिल हो गये (वीडिता अव्रदन्त) चट्टानसदृश शत्रु कोमल बन गये। (ब्रह्मणा बलमभिनत्) ब्रह्मशक्ति से वासना का भेदन किया और (गा उदाजत्) गौओं को बलासुर के बन्धन से निकाल लिया। (तमः अगूहत्) अन्धकार को दूर किया (स्वः व्यचक्षयत्) प्रकाश को प्रकट किया ।

वैदिकसाहित्यसौदामिनी

श्री वागीश्वरो विद्यालंकारः, साहित्याचार्यः

प्रजापतिः। दृष्ट्वा सम्यग्विविच्य सत्यमनृतं च पृथक् चकार। तयोः सत्ये मानवस्य स्वाभाविकीं श्रद्धाम् अनृते च स्वाभाविकीमश्रद्धां न्यधात्। इह सत्यानृतपदे अपि अनेकार्थे। सत्यं कृते (कृतयुगे) च शपथेंतथ्ये त्रिषु तु तद्वति। सत्यानृतं तु वाणिज्यम्। तदुक्तं मनुना--ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम्। मृतं तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम्॥ सत्याऽनृतं तु वाणिज्यं तेन चैवापि जीव्यते। सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत्॥ मनु. अध्या. ४। श्लो. ५, ६। एवमनेकार्थयोः सत्यानृतपदयोर्विरोधो हि तथ्ये- मिथ्याकथने च तयोः शक्ति नियमयति।

अर्थः प्रयोजनम्।

अर्थः प्रयोजनं तच्च चतुर्थ्यादिनिरूपितम्।
भवच्छिदे भज स्थाणुमिह स्थाणोः शिवाऽर्थता॥
२६०॥

शंकुस्थूणादिरूपस्य स्थाणवर्थस्य निषेवणम्।
कल्पते मुक्तये नैव तस्मात् सोऽर्थोऽपनुद्यते॥
२६१॥

स्थाणुपदम् "...स्थाणुः कीले हरे पुमान्। अस्त्रीध्रुवेऽथस्थूणा स्यात् सूर्म्यां स्तम्भे गृहस्य च"। इति मेदिनी। किन्तु भवच्छेदरूपप्रयोजनाय शंकुप्रभृतेः पर्युपासनं न कल्पते। अतो भवच्छेदनरूपं प्रयोजनमिह स्थाणुपदस्य शक्ति शिवरूपेऽर्थे नियमयति। भवच्छेदः=पुनर्जन्मपरम्परावसानम्। तादर्थ्ये चतुर्थीति वाच्यम् इत्यनुशासनम्। तस्मै कार्यमिदं=तदर्थम् तस्य भावस्तादर्थ्यम्। ब्राह्मणादित्वात् ष्यञ्। इति सिद्धान्तकौमुदीटीकायाम् श्री ज्ञानेन्द्र सरस्वती महोदयाः। तेन यूपाय दारु-ब्राह्मणाय दधीत्यादि सिद्धम्।

यथा वा--

भूत्यै जागरणम् अभूत्यैस्वपनम्० यजु० ३०। १७। भूतिर्भस्मनि संपदि। इत्यमरः। जागरूकता संपत्तये प्रमादश्च विभवनाशाय भवतीत्याशयः। इह भूतिपदस्य शक्तिः प्रयोजनेन संपदि नियम्यते। भूतिप्रयोजनाय जागरणमित्यर्थः।

अथ प्रकरणम्--

वक्तृबोद्धव्ययोर्बुद्धिस्थत्वं प्रकरणं मतम्।
देवः प्रमाणमित्यत्र देवस्य युष्मदर्थता॥
२६२॥

एतदाकर्ण्य देवः प्रमाणम्। सर्वं जानाति देवः इत्यादिषु वाक्येषु प्रकरणमेव देवपदस्य शक्ति युष्मदर्थे नियमयति। "देवो मेघे सुरे राज्ञि स्यान्नपुंसकमिन्द्रिये" इति मेदिनी।

यथा वा--

यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि।
तवेत् तत् सत्यमङ्गिरः॥ ऋ. १।१।६।

देवता--अग्निः। ऋषिः--मधुच्छन्दावैश्वामित्रः। छन्दः--गायत्री।

इह प्रकरणवशाद् अङ्गपदं सम्बोधनाऽर्थे नियन्त्रितम्। 'अङ्गमन्तिकगात्रयोः' उपसर्ज-भूते स्यादभ्युपायप्रतीकयोः। "अङ्ग सम्बोधन-हर्षयोः।" इत्युभयत्र श्री हेमचन्द्राचार्याः। अङ्गेत्यभिमुखीकरणार्थो निपातः इति श्री सायणः। दाशुषे दत्तवते यजमानाय। दाश्वान्साह्वान् मीढ्वाँश्च।६।२।१२ इति पाणिनिसूत्रेण दाशृदाने धातोः क्वस्वन्तो निपात्यते। त्वं भद्रं कल्याणं करिष्यसि करोषि। एतत् तव इत्--तवैव सत्यम् अविचाल्यम् व्रतम् शीलमस्ति। तवेयं स्थिरा प्रकृतिर्यत् त्वं तेषां मङ्गलं करोष्येव।

अथ लिङ्ग नाम अनेकार्थस्य शब्दस्य विशिष्टवाच्यार्थसूचकं किमपि चिह्नम् ।

नानार्थपदवाच्यार्थान्तराऽवृत्तिस्तु भेदकृत् ।
एकशक्यगतो धर्मविशेषो लिङ्गमुच्यते ॥ २६३॥

प्रसङ्गेषु वसन्तादेः – कुपितो मकरध्वजः ।
इत्यादौ कोपधर्मेण कामे शक्तिर्नियम्यते ॥ २६४॥

अनेकार्थकस्य कस्यचित्पदस्य इतरार्थेषु अविद्यमानः, एकशक्यमात्रनिष्ठः अतएव तेभ्यस्तस्य भेदकृद् धर्मविशेषो लिङ्गम् ।

यथा–मकराकृतिर्ध्वजो यस्य स कामः समुद्रो वा । कुपितत्वधर्मस्तु काव्येषु कामस्यैव प्रसिद्धः। यथा–कालो मधुः कुपित एष च पुष्पधन्वा० । इह कुपितत्वलिङ्गेन मकरध्वजपदस्य शक्तिः कामे नियम्यते ।

यथा वा—

ऋतं च यत्र श्रद्धा चापो ब्रह्म समाहिताः ।
स्कम्भं तं ब्रूहि कतमः स्विदेव सः ॥
अथर्व० १०।७।११।

स्कम्भपदं स्तम्भब्रह्माद्यनेकार्थम् किन्तु ऋतश्रद्धादिधर्माणां ब्रह्मण्येव संभवादिह स्कम्भपदस्य शक्तिर्ब्रह्मणि नियम्यते ।

अथ शब्दस्याऽन्यस्य सन्निधिः—

अनेकाऽर्थस्य शब्दस्यैकार्थमात्रानुबन्धिनः ।
अन्यार्थवाचिनः सत्ता वाक्येऽन्यशब्दसन्निधिः ॥ २६५॥

वाक्ये करेण नागोऽयं राजतीत्यादिके यथा ।
शक्तिर्नियम्यते सन्निधानेन करनागयोः ॥ २६६॥

सन्निधानेन नागस्य करः शुण्डार्थवाचकः ।
करस्य सन्निधानेन नागस्य च गजार्थता ॥ २६७॥

बलिहस्तांशवः कराः इत्यमर प्रामाण्यान् अनेकार्थस्य करपदस्य अन्यतमोऽर्थो हस्त(शुण्डा) रूपः, तत्सम्बन्धी अन्यार्थवाची शब्दो नागस्तस्य तन्निधानेन करपदस्य शक्तिर्गजे यथा नियम्यते तथैव अनेकार्थकस्य नागपदस्य अन्यतमोऽर्थो गजः, तत्सम्बन्धी अन्यार्थवाचकः शब्दः करः, तत्सन्निधानेन नागपदस्य शक्तिर्गजे नियम्यते । "नागो मतङ्गजे सर्पे पुंनागे नागकेसरे ।" इत्यनेकार्थसंग्रहे हेमचन्द्राः । न चात्रैकशब्दशक्तिनियमनमपरशब्दशक्तिमपेक्षते, येनाऽन्योन्याश्रयदोषः स्यात्, करनागशब्दयोरर्थान्तरस्वीकारेऽन्वयानुपपत्त्या युगपदेव शक्तिनियमनात् । इतिश्री रसगङ्गाधरकाराणामाशयः । श्री विश्वनाथास्तु देवः पुरारिरित्युदाजह्रुः अत्र पुरारिः किं त्रिपुरासुरशत्रुः शिवः, शत्रुनगरनाशकः कश्चिन्नृपतिर्वेति सन्देहे देवतावाचकदेवपदसन्निधिः पुरारिशब्दस्य शक्तिं शिवे नियमयति ।

यथा वा—

निषसाद धृतव्रतो वरुणः पस्त्यास्वा ।
साम्राज्याय सुक्रतुः ॥ यजु० १०।२७।

इह वरुणपदमनेकार्थकम् । 'वरुणोऽर्केऽप्पतौ वृक्षे वरणे वरुणद्रुमे,'' इतिश्री हेमचन्द्राचार्याः । किन्तु पस्त्यासु=प्रजासु, साम्राज्याय चेति पदयोः सान्निध्यात् तन्नृपार्थकम् ।

यथा वा—

वाजे वाजेऽवत वाजिनो नो
धनेषु विप्रा अमृता ऋतज्ञाः ।
अस्य मध्वः पिवत मादयध्वं
तृप्ता यात पथिभिर्देवयानैः ॥
यजु. ६।१८।

देवता–वृहस्पतिः । ऋषिः–वसिष्ठः । छन्दः–निचृत् त्रिष्टुप् ।

मन्त्रेऽस्मिन् विप्राः अमृता ऋतज्ञाः इत्येतेषां

पदानां सन्निधानेन अनेकार्थस्य वाजिन इति पदस्य शक्तिर्ज्ञानिनि नियम्यते । न त्वश्वे । वाजो-निःस्वन-पक्षयोः । वेगे पुमानथ क्लीबे घृतयज्ञान्नवारिषु" इति मेदिनी ।

अथ सामर्थ्यम् । सामर्थ्यं कारणता—

सामर्थ्यं कारणत्वं स्यान्मधुमत्तः पिको यथा ।
पिकस्य मदहेतुत्वाद् वसन्तोऽत्र मधुर्मतः ॥ २६८॥

अस्ति यद्यपि मद्यस्य मदसामान्यहेतुता
विवक्षायां विशेषस्य सामान्यं नहि गृह्यते ॥ २६९॥

"मधुः पुष्परसे क्षौद्रे मद्ये ना तु मधुद्रुमे । वसन्तदैत्यभिच्चैत्रे स्याज्जीवन्त्यां तु योषिति" इति प्रमाण्यादनेकार्थकस्य मधुपदस्य शक्तिः सामर्थ्येन वसन्ते नियम्यते । यद्यपि मद्ये सर्वेषां मादकत्वशक्तिरस्ति तथापि पिकस्य मत्तता-निमित्तत्वं विशेषतया वसन्त एव। सामान्यविशेषयोः सहोपस्थितौ विशेषस्यैव ग्रहणं समुचितम् ।

यथा वा—

तरणि विश्वदर्शतो ज्योतिष्कृदसि सूर्य ।
विश्वमाभासि रोचनम् ॥ ऋ. १।५०।४।

हे ज्योतिष्कृत् सूर्य=हे सर्वप्रकाशक प्रेरक! त्वमतिदीर्घस्य द्युलोकाऽध्वनस्तरिता उपासकानां विविधरोगेभ्य स्तारयिता चाऽसि । त्वं विश्व-दर्शतः=विश्वैर्दर्शनीयः, विश्वं जगत् दर्शतं= दर्शनीयं वा येन तथोक्तश्चासि। त्वं विश्वं रोचनं= दीप्तमन्तरिक्षमभिव्याप्य आभासि भाससे भासयसि वा । अथवा—साधकानां सन्मार्गप्रेरक हे देव त्वं हि नः संसारसागरात् तरणिः=तार-यिता दिव्यशक्तीनां प्रकाशकश्चासि । त्वं रोचनम् अध्यात्मप्रकाशेन दीप्तं नो हृदयम् आभासि= आभासय । "तरणिर्द्युमणौ पुंसि कुमारीनौकयोः स्त्रियाम् । इति मेदिनी वचनादनेकार्थकमिदं पदमिह सूर्यपरकं तस्यैव ज्योतिष्कृत्वसामर्थ्यात् विश्वदर्शनहेतुत्वाच्च । अध्यात्मपक्षे तरणि पदस्य तारयितृरूपोऽर्थोऽपि निर्णायकः स्यात् ।

अथौचिती—

औचितीं योग्यतामाहुः सामञ्जस्यमथापि वा ।
स्यादमङ्गलभङ्गाय मुखं तव महीपतेः ॥ २७०॥

कुपितेन उपेक्षावता वा स्वामिनो मुखेन सेवकस्य मनोरथसिद्धिर्न भवतीत्यौचित्यात् प्रसादाभिमुखे मुखे एव मुखपदस्याऽत्र शक्तिः । संयोगादिष्वेषु कार्यकारणभावे सामर्थ्यम् । चतुर्थ्यादिनिरूपितायां तदर्थतायामर्थः, अनयोर्द्वयोरभावेऽपि कस्यचिदने-कार्थकस्य पदस्य एकार्थमात्रवृत्तिरितरभेदसूचको धर्मविशेषो लिङ्गम्, कार्यकारणभावादिभिः संभव-त्स्वप्यन्येष्वर्थेषु अन्यतमस्य तत्र सामञ्जस्यम् औचिती, कार्यकारणभावतादर्थ्याऽन्यतमाऽर्थो-पष्टम्भकभेदसूचकधर्मविशेषाऽभावेऽपि स्वोपस्थितया अन्यतमार्थनिर्णायकत्वे अन्यशब्दसन्निधिरिति विवेकः ।

यथा वा—

सूर्यायाः वहतुः प्रागात् सविता यमवासृजत् ।
मघासु हन्यन्ते गावः फल्गुनीषु व्युह्यते ॥
ऋक्. १०।८५।१३। अथर्व. ।१४।१।१३

वहतुः विवाहः, रथः कन्यायै पित्रा दीयमानं धनादिकं वा । गावो धेनवः, सूर्यरश्मयश्च । स्वर्गेषु पशुवाग्वज्रदिङ्नेत्रघृणिभूजले । लक्षदृष्ट्या स्त्रियां, पुंसि गौर्लिङ्गचिह्नशेफसोः ।" इत्यमरः। हन् हिंसागत्योः इति धातोः हन्यन्ते मार्यन्ते प्रेर्यन्ते वा । मघानक्षत्रदिवसेषु गावः सूर्यरश्मयः, हन्यन्ते हततेजस्का भवन्ति, सूर्येण चन्द्रमसं पृथिवीं प्रतिवा प्रेर्यन्ते । फल्गुनीनक्षत्रदिवसेषु च विवाहा विधीयन्ते । इह अनेकार्थकस्य गोपदस्य शक्ति-रौचित्या सूर्यरश्मिषु, वधगमनार्थकस्य हन्धातोश्च

गमनार्थे नियम्यते । गोवधपरकस्याऽपरार्थस्य अनौचित्यात् । नैषधीयचरितेऽपि--

विवस्वताऽनायिषतेव मिश्राः
स्वगोसहस्रेण समं जनानाम् ।
गावोऽपि नेत्राऽपरनामधेया-
स्तेनेदमान्ध्यं खलु नान्धकारैः ॥
नैष० २२।३४।

यथा वा--

समानी प्रपा सहवोऽन्नभागः
समाने योक्त्रे सह वो युनज्मि ।
सम्यञ्चोऽग्निं सपर्यता-
ऽऽरा नाभिमिवाऽभितः ॥ अथर्व. ३।३०।६।

युष्माकं जलपानस्थानमेकं भवतु । अन्नं भज्यते विभज्यतेऽस्मिन्निति भोजनस्थानमप्येकं भवतु । सम्यञ्चः=सम्यक् सह वा अञ्चन्तो यूयं नाभिं परितः स्थिताः अरा इव अग्निं=यज्ञाग्निम् भगवन्तं, स्वकुलाग्रगण्यं वा सपर्यत=पूजयत । अहं युष्मान् सर्वान् एकेन योक्त्रेण प्रेमसूत्रेण संयुक्तान् करोमि । यथा योक्त्रेण बद्धाबलीवर्दा विरुद्धासु दिक्षु न धावन्ति तथा यूयमपि ऐकमत्येन सह सञ्चारिणो भवतेति तात्पर्यम् । योक्त्रम् रथ-युगे वृषभयोर्बन्धनसाधनरज्जुः । अत्रापि औचित्येन योक्त्रपदस्य शक्तिः प्रेमसूत्रे नियम्यते । ननु योक्त्रपदस्य कोषेशु प्रेमसूत्ररूपो द्वितीयोऽर्थो न दृश्यते तत्कथमिदमुदाहरणमनेकार्थकपदानां संयोगादिभिरेकार्थनियमनप्रकरणे संगतं स्यात् । इति चेत्-काव्यप्रकाशे, साहित्यदर्पणे रसगङ्गाधरेऽपि च पातु वो दयितामुखम् । इत्यत्र दयितामुखकर्तृकरक्षणकर्मत्वाक्षिप्तानां सम्बोध्य पुरुषाणां त्राणं हि तस्याः सांमुख्येनैव (आनुकूल्येन) एव भवति । ननु मुखमात्रेण । वैमुख्ये तेन त्राणायोगात् । अतस्त्राणाऽर्हत्वं वदनसांमुख्योभयप्रत्यायकस्य मुखशब्दस्य । इत्यादि प्राचां वचनमाद्रियमाणैरेवेदमिह प्रदर्शितम् । येषां त्विह न रुचिस्तैरुदाहरणान्तरं द्रष्टव्यम् । यद्यपि पण्डितराजेनाऽत्र वदनसांमुख्योभय (उभयार्थ) प्रत्यायकस्येति लिखितम् तथापि द्वितीयोऽर्थोऽत्र लाक्षणिको नतु क्वापि वाच्यः इति स्वयं सुधीभिर्विभावनीयम् । "मुखं निःसरणे वक्त्रे प्रारम्भोपाययोरपि। सन्ध्यन्तरे नाटकादेः । शब्देऽपि च नपुंसकम् ।" इति मेदिनी । मुखपदस्य नानार्थेष्वेषु सांमुख्यं न दृश्यते ।

अथ देशः--

देशस्तु ग्रामनगराऽन्तरिक्षभूतलादिकः ।
अनेकार्थकशब्दस्याऽन्यतमार्थनियन्त्रकः ॥
२७१॥
अम्बरे चन्द्र आभाति क्षितौ क्षितिपतिर्यथा ।
सम्बन्धादम्बरेणाऽत्र चन्द्रस्य विधुवाचिता ॥
२७२॥

"चन्द्रः कर्पूरकाम्पिल्लसुधांशुस्वर्णवारिषु ।" इति मेदिनीवचनादनेकार्थकस्य चन्द्रपदस्य शक्तिरिह अम्बरदेशसम्बन्धेन विधौ नियम्यते ।

यथा वा--

अमी य ऋक्षा निहितास उच्चा
नक्तं ददृश्रे कुहचिद् दिवेयुः ।
अदब्धानि वरुणस्य व्रतानि
विचाकशच्चन्द्रमा नक्तमेति ॥
ऋ. १।२४।१०।

'ऋक्षः पर्वतभेदे स्याद् भल्लूके शोणके पुमान्। कृतवेधनेऽन्यलिङ्गो नक्षत्रे पुंनपुंसकम् ।" इति मेदिनीप्रामाण्याद् भल्लूकाद्यनेकार्थकमपि ऋक्षपदमिह "उच्चा निहितासः" द्युलोके स्थिताः इति देशनिर्देशेन, नक्तं ददृश्रे इति कालभेदेन च नक्षत्राऽर्थे नियम्यते । ददृश्रे-दृशेर्लिटि इरयोरे (पाणि० ६।४।७६) इति सूत्रेण इरे आदेशः । ददृश्रे=सर्वैर्दृश्यन्ते । निहितासः-आज्जसेरसुक्

(पाणि. ७।१।५०)। दिवा=दिवसे । ईयुर्गच्छन्ति कुहचिदिति न ज्ञायते । वरुणस्य व्रतानि अदब्धानि वरुणदेवस्य नियमा अदब्धा:=न केनापि खण्ड्यन्ते । अत्र अदब्धानि वरुणस्य व्रतानीति तृतीयचरणस्याऽर्थोऽवशिष्टै-स्त्रिभिर्निष्पाद्यते । तैर्विना सोऽसङ्गत एव भवेदिति काव्यलिङ्गमलङ्कार:। तदुक्तं साहित्यदर्पणे—हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम् ।

अथ काल:—

वर्षाऽहोरात्रमासादिरूपश्च काल उच्यते ।
सोऽप्यनेकार्थशब्दानामेकत्राऽर्थे नियामक: ।।
२७३।।

दिवसे द्योतते हंसो द्विजराजो निशागमे ।
हंसो दिवससम्बन्धादिह सूर्य: प्रतीयते ।।
२७४।।

निशया सह सम्बन्धेनाऽत्र द्विजराजश्चन्द्र: । "दन्तविप्राण्डजा द्विजा:।" इतिद्विजपदस्याऽप्यनेकार्थता । तदुक्तं नैषधीये—का नाम बाला द्विजराजपाणिग्रहाऽभिलाषं कथयदलज्जा ?

यथा वा—

मूर्धा भुवो भवति नक्तमग्नि-
स्तत: सूर्यो जायते प्रातरुद्यन् ।
मायामू तु यज्ञियानामेताम्
अपो यत्तूर्णिश्चरति प्रजानन् ।।
ऋ. १०।८८।६।।

नक्तं रात्रौ अग्निरेव भौतिकोऽग्निरेव भुवो मूर्द्धा भवति=मूर्धेव प्रधानप्रकाशको भवति । तत: प्रात: स एवाग्नि: उद्यन् सूर्यो जायते उदयमवाप्नुवन् सूर्यरूपेण प्रकाशते । अथ एतां मध्यस्थानामपि देवतां विद्युद्रूपां यज्ञियानाम्=मिथ: संयोगार्हाणां पदार्थानाम् मायामेव कर्मपरिणामं वा प्रजानन्=विज्ञानविदो जानन्ति । अथवा प्रजानन्निव स्वकर्तव्यं कर्म जानन्निवेत्यर्थ: । स एव मध्यस्थानो देव: । तूर्णि:=नितरां शीघ्रगामी । अपश्चरति=मेघात्मकेषु जलेषु संञ्चारं समाचरति। अप: कर्माणि वा वृत्रवधादीनि चरति विधत्ते । "माया स्याच्छाम्बरी बुद्धयो:" इति मेदिनी । तूर्णि:=त्वरमाण: इति निरुक्ते यास्क:(७।७।२७) वहि श्रिश्रु··· त्वरिभ्योनित् (उणा. ४९१) एकैव सा शक्ति: समयभेदेन त्रिधा प्रकाशते । रात्रिसम्बन्धेनाग्नि:, दिवससम्बन्धेन सूर्य:, स एव जलसम्बन्धेन मध्यम:। तथाहि—"अयमेवाऽग्निर्वैश्वानर: इति शाकपूणि: । विश्वानरावेते उत्तरे ज्योतिषी (विद्युत्सूर्यौ) वैश्वानरोऽयं यत् ताभ्यां जायते । कथ न्वयमेताभ्यां जायते ? यत्र वैद्युत: शरणं (स्वाश्रयम् मेघम्)अभिहन्ति यावदनुपात्तो भवति। मध्यमधर्मैव तावद् भवति । उदकेन्धन: शरीरोपशमन: । (स हि मध्यमो जलमिन्धनं समृद्दीपकं यस्य । शरीरस्य प्राणिदेहस्य च उपशामको मृत्युहेतु:) उपादीयमान एवाऽयं सम्पद्यते उदकोपशमन: शरीरदीप्ति: (अर्थात् विपरीतधर्मा)। अथ आदित्यात्—उदीचिप्रथमसमावृत्ते आदित्ये (ग्रीष्मर्त्तौ) कंसं वा मणिं वा (अवनतोदरमित्यर्थ:) परिमृज्य प्रतिस्वरे (रश्मिसंग्रहकेन्द्रे— FOCUS) यत्र शुष्कगोमयमसंस्पर्शयन् धारयति तत् प्रदीप्यते । सोऽपि (सूर्योऽपि) अयमेव भौतिकोऽग्निरेव तदा सम्पद्यते ।" (निरुक्ते–७।६।२३) यो दिवि सूर्य: स एवान्तरिक्षेऽशनि: पृथिव्यां चाग्निरिति तात्पर्यम्।

अथ व्यक्ति:—

पुंस्त्रीप्रभृतिलिङ्गानि ज्ञायन्ते व्यक्तिसंज्ञया ।
क्लीबे नभो वियद्वाचि तत्पुंसि श्रावणाऽर्थकम्।।
२७५।।

मित्रो भातीति पुंल्लिगे सूर्य वाचि च यत्पदम् ।
मित्रं भातीति तत्क्लीबे सुहृदर्थे नियन्त्रितम् ।।
२७६।।

"····नभ: क्लीवं व्योम्नि पुमान् घने ।

श्रावणघ्राणवर्षासु विसतन्तौ पतद्ग्रहे ।।" इति मेदिनीप्रामाण्यात् क्लीबे यन् नभःपदं व्योम वाचकं तदेव पुंसि श्रावणमासाद्यर्थकम् । "नभाः श्रावणिकश्च सः "इत्यमरः । नभ आदित्यो भवति नेता रसानां भासां ज्योतिषां प्रणयोऽपि वा भन एव स्याद् विपरीतः । इति निरुक्ते (२।४। १४) यास्कः ।

अथापि--

> अभयं मित्रादभयममित्राद्
> अभयं ज्ञातादभयं परोक्षात् ।
> अभयं नक्तमभयं दिवा नः,
> सर्वा आशा मम मित्रं भवन्तु ।।
>
> अथर्व० १६।१५।६।

सर्वा आशाः=सर्वा दिशः, लक्षणया तत्र निवासिनो जना मम मित्रं=मम सुहृदः सन्तु । इह मित्रपदं नपुंसकलिंगकं सुहृदर्थे । किन्तु--

> अयं मित्रो नमस्यः सुशेवो
> राजा सुक्षत्रो अजनिष्ट वेधाः।
> वयं तस्य सुमतौ यज्ञियस्याऽ-
> पि भद्रे सौमनसे स्याम ।।
>
> ऋ० ३।५६।४।

देवता-मित्रः। ऋषिः=गाथिनो विश्वामित्रः। छन्दः=त्रिष्टुप् । प्रमीतेः त्रायते । सम्मिन्वानो द्रवतीति वा । मेदयतेर्वा । प्रमीतेर्मरणात् त्रायते । इति मित्रः । अमिचिमिदिशसिभ्यः क्त्रः (उणादि ६०३ ।

अयमिति--एषः नमस्यः-सर्वैर्नमस्करणीयः। सुक्षत्रः=शोभनक्षत्रबलोपेतः । मित्रः सूर्यः सूर्य सदृशप्रतापो वा । सुशेवः=सुखप्रदाता । वेधाः= प्रजानां भाग्यविधातेव । नः राजा अजनिष्ट= प्रजाभिः कृतवरणः सिंहासनमधिरूढः । तस्य= तथाविधस्य, यज्ञियस्य=राजसूयादियज्ञार्हस्य सङ्गमनयोग्यस्य वा सुमतौ शोभनमतौ भद्रे सौमनसे च सौमनस्ये च वयं भवेम । अत्र पुंल्लिगकं मित्रपदं सूर्यं सूर्यसदृशं वा राजानमाह ।

तथा--

मित्रो जनान् यातयति ब्रुवाणो मित्रो दाधार पृथिवीमुत द्याम्० ।। ऋ० ३।५६।१। मित्रः सूर्यः पुरोवातो वा ब्रुवाण इव आलपन्निव कृषकान् जनान् यातयति=कृष्यर्थं प्रयत्नाय प्रेरयति । स एव वृष्टिकर्मणा पृथिवीं द्युलोकं च धारयति । स मित्रः अनिमिषा=निमेषशून्यया दृष्ट्येव कृष्टीः=कर्षकान् अभिचष्टे । तस्मै मित्राय घृतवत् हव्यं जुहोत । यज्ञाद् भवति पर्जन्यः पर्जन्यादन्न-संभवः । इति भगवद्गीतायाम् । वृष्ट्यर्थं यज्ञं समाचरतेत्याशयः ।

अथ स्वरः--

> उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः ।
> नियतास्ते श्रुतौ तस्मान्निश्चितार्थप्रकाशकाः ।।
>
> २७७।।

अतएव पाणिनीय शिक्षायामुक्तम्--

> मन्त्रो हीनः स्वरतो वर्णतो वा
> मिथ्या प्रयुक्तो न तमर्थमाह ।
> स वाग्वज्रो यजमानं हिनस्ति
> यथेन्द्रशत्रुः स्वरतोऽपराधात् ।।

तद् विवृणोति--

> इन्द्रस्य शत्रुरित्यत्र षष्ठीतत्पुरुषे कृते--
> इन्द्रशत्रुपदस्याऽन्त्यपदोदात्तत्वमीप्सितम् ।।
>
> २७८।।
>
> असुरैस्तु स्वराऽज्ञानादाद्युदात्ततयेरितम् ।
> बहुव्रीहिसमासेन विरुद्धार्थं तु तत्कृतम् ।।
>
> २७९।।
>
> तेनेन्द्रः शत्रुरस्येतीन्द्रे हि शातन कर्तृता ।
> प्राप्ता, वृत्रासुरस्तेनानुष्ठानेन स्वयं हतः ।।
>
> २८०।।

इन्द्रस्य शत्रुः शातयिता वृत्रासुरो वर्धता-

भारतवर्षस्य स्वराज्यप्राप्तेर्महोत्सवः संस्कृतविश्वविद्यालयस्थापनायाः प्रस्तावश्च १५-१६।८।१९४७

१४।८।१९४७ई० दिनाङ्को हि भारतवासिनामपूर्वहर्षोल्लासयोर्दिवसत्वेनामन्यत सर्वत्रापि भारते। १५-१६।८।१९४७ दिनाङ्कयो राजकीयमहाविद्यालयेऽपि सोत्साहं स महोत्सवो निरवर्त्तत। १६।८।४७ दिनाङ्के प्रधानाचार्यस्य विशेषप्रेरणया निर्देशेन च म० म० पं० नारायणशास्त्रिखिस्तेमहोदयेन विरचिताया भारतमातुः कथायाः श्रवणेन सह पूजापि सर्वैः सश्रद्धमक्रियत।

अस्मिन्नेवावसरे **वैदिकपद्धतिमाश्रित्य** प्रधानाचार्येण स्वविरचितमधोनिर्दिष्टं मातृभूमेरभिनन्दनमपि सदस्यानां पुरतः श्रावितम्।

मातृभूमेरभिनन्दनम्

स्वतन्त्रतादिवसः

(अधिकश्रावण-कृष्ण १४, संवत् २००४ विक्रम०)
(१५।८।१९४७)

सा नो माता भारती भूविभासताम्।

येयं देवी मधुना तर्पयन्ती,
तिस्रो भूमीरुद्धृता द्योरुपस्थात्
कामान् दुग्धे विप्रकर्षत्यलक्ष्मीं।
मेधां श्रेष्ठां सा सदास्मासु दध्यात्॥१॥

सर्वे वेदा उपनिषदश्च सर्वा
धर्मग्रन्थाश्चापरे निधयो यस्याः।
मृत्योर्मर्त्यानमृतं ये विशन्ति वै
सा नो माता भारती भूविभासताम्॥२॥

यां प्रच्युतामनु यज्ञाः प्रच्यवन्ते
उत्तिष्ठन्ते ते भूय उत्तिष्ठमानाम्।
यस्या व्रते प्रसवे धर्म एजते
सा नो माता भारती भूवि भासताम्॥३॥

यां रक्षन्त्यनिशं प्रतिबुध्यमाना
देवा ऋषयो मुनयो ह्यप्रमादम्।
राजर्षयोऽपि ह्यनघाः साधुवर्याः
सा नो माता भारती भूवि भासताम्॥४॥

महान्तोऽस्यां महिमानो निविष्टा
देवा गातुं यां क्षमन्ते न सद्यः।
सा नो वन्द्या भ्राजसा भ्राजमाना
माता भूमिः प्रणुदतां सपत्नान्॥५॥ इति।

तदनन्तरमेकः प्रस्तावः प्रधानाचार्येण प्रस्तुतः सर्वैः सहर्षोल्लासं स्वीकृतोऽभूत्। सच प्रस्ताव एवमासीत्—

"नूनमभूतपूर्वोऽयं समयो भारतवर्षस्य दैर्घकालिक इतिहासे। चिरकालिकपारवश्यमहातमिस्रातमोऽपगमे भारतीयगगनमण्डले दिव्यं प्राभातिकं ज्योतिर्नो मानसकलिकाः प्रबोधयदिवादलोक्यते। चतुर्दिशं भारतीयप्रजागरः स्पष्टं दरीदृश्यते। तदस्मिन् शुभावसरे देववाण्या अपि भूयो विश्वव्यापी यशः प्रसारो भवेदित्येतदर्थं सर्वथा विश्वविद्यालयीययोग्यतां भजमान एष महाविद्यालयः शासनेन सद्य एव वैधानिकदृष्ट्या वस्तुतो विश्वविद्यालयरूपतामानेय इति"।

प्रस्तावस्यास्यात्यन्तं महत्त्वम्

अयं प्रस्तावः सुतरां सहर्षं सोल्लासं च समर्थितोऽनेकैर्विद्वद्भिः। प्रधानाचार्येण शिक्षामंत्रिणं श्रीसंपूर्णानन्दं प्रति शिक्षासंचालकद्वारा प्रेषितः शासनस्य विचारार्थम्। अत्र स्मरणीयमेतद् यदन्ततोऽस्यैव प्रस्तावस्याधारेण **वाराणसेयसंस्कृतविश्वविद्यालयस्य** स्थापना आगामिनि काले समजायत। प्रधानाचार्येण प्रेरिताः केचिदन्येऽपि संस्कृतमहाविद्यालयास्तमेव प्रस्तावं समर्थ्य शासनसमीपे प्रेषितवन्तः।

एतद्विषयकस्य प्रधानाचार्यपत्रस्य महत्त्वदृष्ट्या प्रतिलिपिरिंग्लिशभाषायामित्थं विद्यते—

Principal
Govt. Sanskrit College,
Benares
Dated August 29/30, 1947

D. O. No. 125

Dear Mr. Sahney,

The last Independence Day was duly celebrated, both in the Sanskrit College and the local Sanskrit Pathashalas. There was one special feature of these celebration among the Sanskrit people whichit is worth while to bring to your notice and through you to the notice of the Hon. Minister of Education.

On the 15th instant the local Pandits of the Pathshalas held a meeting at Jnanavapi in which among other things they also resolved that it was a universal desire among the Sanskritists that the unique and historical occasion of Independence of India should be marked by the establishment at an early date of a Sanskrit University at Benares and that earliest steps be taken in that direction by at least appointing a Government Committee to prepare a scheme of the University.

A similar resolution having the same ideas was also passed at the meeting of the College staff, students and other distinguished scholars held at the Sanskrit College.

I need not point out that the idea of developing the Benares Sanskrit College into a Sanskrit University was also strongly recommended by the Sanskrit College Re-corganisation Committee in 1939. Government have approved the scheme of developing the Saraswati Bhawan into a Research Institute. There are also proposals of having the Anglo Department of the College recognised for the B. A. (in English only) and M. A. examinations by the Agra or the Benares University. I have been also asked to submit a scheme for a Training College for the Sanskrit Pandits.

In view of the above schemes already before the Government; the proposal of having a Government Committee for preparing the shceme for the proposed Sanskrit University is naturally the next step. I would therefore recommend that the time is ripe enough for actively taking up the above proposal.

Yours Sincerely,
Sd. M. D. Shastri

C. L. Sahney, Esqr. M. Sc.,
Director of Education, U. P.
4 A, Park Road,
Lucknow.

Copy forwarded to Shri Amolakh Chand Jain for the information of the H. M. E.

Sd. M. D. Shastri

" देवी रामरखी "

(मुक्तं वृत्तम्)

डा० राजमणि पाण्डेयः, कुरुक्षेत्र विश्वविद्यालयः

दासताविवशीकृते आङ्ग्लैः पराजितभारते
लार्डहार्डिञ्जाख्यगौराङ्गप्रशासितभारते
चान्दनीचौकाख्यवीथ्यायां हि दिल्लीपत्तने
लार्डहार्डिञ्जस्य नानाभूतिभूषितकुञ्जरे ।

स्फोटके क्षिप्ते च हार्डिञ्जे कथञ्चिज्जीविते
आहते वै रक्तरक्ते भृत्यलोके संस्थिते
मृत्युदण्डे घोषिते वै देशभक्तचतुष्टये
वीर-'बालमुकुन्द'-सहिते देशहितहुतजीविते ।

वीर –"बालमुकुन्द"– पत्नी रामरख्याख्या शुभा
सा हि दुःखार्ता नवोढा वर्तते कृच्छ्रं गता
घोरकारागारक्षिप्तामरणबन्धितभर्तृका
सा सती देवी भगवती दुःखिता शोकं गता ।

सततसततैर्महायतनैर्वर्तितं देव्या तथा
प्राणप्रियपत्युः कथञ्चिद् दर्शनं लब्धं तया
सा गता कारामपृच्छत्त्वं प्रियमश्नासि किम् ?
'मृत्तिकामिश्राः प्रिये! ननु 'रोटिकाः'इति सोऽब्रवीत् ।

सा ततः आगत्य गेहं मृत्तिकामिश्रां शुभा
रोटिकामशितुं समारेभे पतिप्राणा प्रिया ।
सा गता कारामपृच्छत्त्वं प्रियं "त्वं स्वपिषि क्व?"
"कम्बलद्वयशयनमय्यामन्धकक्षायां प्रिये ! "

सा ततः आगत्य गेहं कम्बलद्वयशयनके
अन्धकक्षे स्वप्तुमारेभे पतिप्राणा प्रिया ।
वध्यभूमिं स मुकुन्दः प्राप्तवान् वीरो यदा
सापि देवी वेदिकायां क्वचिद्ह्युपविष्टा तदा
सा शुभा मनसा तथा प्राणैश्च बुद्ध्या चात्मना
स्वप्रियेण सङ्गता परमे समाधौ सुस्थिता ।

अयं महिमा देवताया रामरख्याः श्रूयते
यत्र काले स मुकुन्दो निजान्प्राणांस्त्यक्तवान्
तत्र काले सापि देवी स्वं प्रियं याताऽसुभिः
दुर्लभा लब्धा चिताशय्या तया पत्या सह
पावकीभूता च पत्या दीप्यते साद्यापि वै ।।

—)०(—

अपि विद्यते ध्वन्याख्योऽलङ्कारः कश्चित् ?

य० कृष्ण शर्मा

क्रिस्तीयनवमशतकस्य उत्तरार्धे रचितः कविराजमार्गाख्यः अलंकारशास्त्रग्रन्थः कश्चन विद्योतते कन्नडभाषायाम् । उपलब्धेषु कन्नडग्रन्थेषु अयमेव प्राचीनतमः इतिप्रथते । कन्नडसाहित्येतिहासे कविराजमार्गस्यास्य विशिष्टं स्थानं वर्तते । यद्यप्ययमलंकारशास्त्रग्रन्थः, तथापि कांश्चिदनन्यलभ्यान् चारित्रिकानंशानुपहरति अयमैतिहासिकेभ्यः विमर्शकेभ्यश्चाद्ययावत् । कविराजमार्गस्यास्य बहुषु अंशेषु दण्डिनः काव्यादर्श एवादर्शः । क्वचित्पुनः भामहस्य काव्यालंकारोऽपि । लक्ष्यपद्येषु केषुचित् भारवेः माघस्य च च्छाया विलोक्यते । बहूनि चान्यानि लक्ष्यपद्यानि ग्रन्थकर्तुः स्वकीयानि इति विमर्शकानां निर्णयः ।

राष्ट्रकूटवंशस्य नृपतुंगस्य नाम राज्ञः सभासदा श्रीविजयनाम्ना विद्वत्कविना कविराजमार्गोऽयं रचितः स्यादिति सम्भाव्यते । नृपतुङ्ग एव रचयिता ग्रन्थस्यास्य इत्यपि केचिदभिप्रयन्ति ।

भारतीयकाव्यमीमांसायां कविराजमार्गस्य निर्विवादमेव विशिष्टं स्थानं वर्तते । यद्ययं गैर्वाण्यां रचितः अभविष्यत्, तदा गुणसम्प्रदायस्यान्यतमकृतित्वेन समग्रेऽपि भारतेऽस्य प्रचारोऽभविष्यत् ।[1] श्रीमतां भामहदण्डिप्रभृतीनामालंकारिकाणां अनन्तरं श्रीमदानन्दवर्धनस्य समकालिकोऽयं कविराजमार्गकारः इति ऐतिहासिकानां राद्धान्तः । सन्त्यत्र कविराजमार्गे—केचन मौलिकाः विचाराः काव्यमीमांसासम्बन्धिनः । काव्यतत्त्वार्थकं ध्वनिरिति पदं भारतीयकाव्यमीमांसायां कविराजमार्गग्रन्थे एव इदं प्रथमतया प्रयुक्तं दृश्यते इति विपश्चितां विश्वासः । यतः क्रिस्तीयात् सप्तत्युत्तराष्टशततमात् वर्षादूर्ध्वं सप्तसप्तत्युत्तराष्टशततमाच्च वर्षात्पूर्वं (क्रि० ८७०–८७७) कविराजमार्गोऽयं रचितः स्यादित्यभ्यूहन्ते विद्वांसः । ध्वन्यालोकस्यापि प्रायः स एव रचनाकालः स्यात् । अथापि यदा चायं कविराजमार्गग्रन्थः पूर्णतामैत् तदानीमेव ध्वन्यालोकोऽपि पूर्णतामगमन्न वेति निश्चेतुं न किमपि ऐतिहासिकं प्रमाणमुपलभ्यतेऽद्ययावत् । पूर्णतां गतेऽपि वा ध्वन्यालोके, काश्मीरेभ्यः क्रोशानां सहस्रैः दूरे कर्णाटकेषु स्थितः कविराजमार्गकारः कथं वा ध्वन्यालोकं द्रष्टुं शक्नुयात् ? ध्वन्यालोकमदृष्ट्वैव वा कथंतरां ध्वनेः स्वरूपं साकल्येन जानीयात् ? कविराजमार्गस्य रचना ध्वन्यालोकस्य रचनातः किंचिदिव पूर्वमेव वा स्यात् । अतः कविराजमार्गस्थं ध्वनिपदमेव भारतीयकाव्यमीमांसायां ध्वनिपदप्रयोगस्य प्रथमोदाहरणमिति मन्यन्ते संशोधकाः ।

तदस्तु नाम । ध्वनेः स्वरूपं किमभिप्रैति कविराजमार्गकारः ? इति पश्यामस्तावत् । इदमस्ति कविराजमार्गे ध्वनिपदघटितं कंदपद्यमेकम् । यथा—

ध्वनियेंबुदष्लंकारं
ध्वनियिसुगुं शब्ददिंदमर्थदे दूष्यम् ।
नेनेवुदिदनितु कमलदो—
ध्वनिमिषयुगमोप्पितोर्पुदिंतिदु चोद्यम् ।।

—कविराजमार्गः ३ –२०८

ध्वनिरित्यलंकारः
ध्वन्यते शब्देन अर्थेन दूढयम् ।
स्मर्तव्योऽयमित्थं

---

१. कविराजमार्गग्रन्थमिमं गैर्वाण्यामनुवदितुमर्हन्ति विद्वांसः ।

कमलेऽनिमिषयुगं काशतेतरामितीदं चोद्यम् ॥
—इति च्छाया ।

ध्वनिस्तावदलंकारः, सोऽपि शब्दैरेव ध्वन्यते, न पुनरर्थेनापि । "कमलेऽनिमिषयुगं काशतेतरां" इत्यादिलक्ष्यानुरोधेन यथायोग्यं पूर्वोक्तालंकाराणामन्यतमः स्मर्तव्यः इति पद्यार्थसंग्रहः । सूत्रप्रायत्वात्कारिकायाः अर्थवैशद्याय अपेक्षिताः शब्दाः निवेशयितुं नैव पारिताः ग्रन्थकारेण । "ध्वनिरित्यलंकारः" इत्यनेन वचनेन सर्वे मुह्यन्ति ।" "अर्थेन दूढ्यं" इत्यत्रापि अर्थक्लेशो बाधते सर्वान् इतीयमत्र पद्ये वस्तुस्थितिः ।

ध्वनिः, ध्वन्यते इति पदद्वयं प्रयुक्तमत्र कविराजमार्गकारेण । पद्यमिदं विद्वद्व्याख्यातृविमर्शकान् आह्वयति स्व वास्तविकार्थप्रकाशनाय । ख्यातनामानः नैके कन्नडविद्वांसः पद्यमिदं व्याख्यन् अद्ययावत् । जाग्रत्यप्यंशतोऽभिप्रायभेदे, सर्वेऽपि विद्वांसः अत्रेदं स्वीकुर्वन्ति यत्—"अत्र च कारिकायां कविराजमार्गकारेण ध्वनिरिति कश्चिदपूर्वः अलंकारः लक्ष्यलक्षणोपन्यासपूर्वकं निरूप्यते" इति । "काश्मीरेषु अभिनवोत्थितस्य ध्वनेर्ध्वनिः (अस्पष्टस्वरूपमित्यर्थः) कर्णपरम्परया कविराजमार्गकारेण श्रुतः स्यात् । तस्यापि अभिनवस्य काव्यतत्वस्य स्वकीयेऽलंकारशास्त्रग्रन्थे स्थानं देयमिति मनीषया सः ध्वनिसंज्ञकं कंचनालंकारविशेषं न्यरूपयत्" इति निरणयन् कन्नडविद्वांसः ।

"अर्थेन दूढ्यं" इति भागस्य "अर्थतो दूढ्यः" इत्याकारकत्वं स्वीकृत्य "वाच्यार्थोऽसङ्गतः, अत एव दूढ्यः अथापि ध्वन्याख्येन व्यापारान्तरेण प्रतीयमानः चमत्कारः एव ध्वन्यलंकारस्यास्य विशेषता ।' कमलेऽनिमिषयुगं काशतेतरामित्यत्र वाच्यार्थोऽसङ्गतः । कमले मीनद्वयावस्थितेरर्थस्य बाधितत्वात् । अथ च ध्वन्याख्यव्यापारेण योऽर्थः प्रतीयते स पुनः सुन्दरः" इत्येवंरूपेण स्वोत्प्रेक्षितं ध्वन्यलंकारं समर्थयन्ति कन्नडविमर्शकाः ।

अहं तु पश्यामि यत् – नात्र कविराजमार्गकारः ध्वन्याख्यमपूर्वमलंकारविशेषमङ्गीकरोति । अपि तु प्रसिद्धालंकारेभ्यः अतिरिक्तसत्तां केवलं ध्वनेः निराकरोति इति । "काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वः" इत्यनेन आनन्दवर्धनस्य वचनेन काव्यतत्वस्य ध्वनेः व्यवहारः आलंकारिकजगति आनन्दवर्धनात्पूर्वमेव प्रचलितः आसीदिति प्रतीयते । एवं च आनन्दवर्धनात् पूर्वं तत्समकालमेव वा ध्वनेः खण्डनमपि आलंकारिकजगति आरब्धमासीदित्यभ्यूहनं नातीव असङ्गतं स्यात् । तथा च कविराजमार्गकारः अलंकारान्तर्भाववादी तृतीयाभाववादरूपस्य पूर्वपक्षस्य समर्थकः इति मदीयोऽभिप्रायः ।

अत्रैवं प्रत्यवतिष्ठन्ते ध्वन्यलंकारवादिनः यत् – "आनन्दवर्धनात्पूर्वं तत्समकालमेव वा आलंकारिकजगति ध्वनेः मण्डनं खण्डनं च प्रचलतः स्मेत्यत्र न किमपि ऐतिहासिकं प्रमाणमुपलभ्यतेऽद्ययावत् । ध्वन्यालोके दर्शिताः सर्वेऽपि पूर्वपक्षाः स्वयमानन्दवर्धनेनैव सम्भावनया उद्भाव्य दूषिताः इति अभिनवगुप्तेनैवोक्तम् । कविराजमार्गकारस्तु आनन्दवर्धनस्य समकालिकः, किंचिदिव प्राचीनो वा भवति । अर्थात् ध्वन्यालोकादपि पूर्वमेव कविराजमार्गः रचितः स्यादिति । तत्कथं वा सः आनन्दवर्धनस्य ध्वनिं जानीयात्साकल्येन ? कथंतरां वा ध्वनिमलंकारेष्वन्तर्भावयेत् ? कथंतमां च व्यञ्जनावृत्तिं दूषयेत् ? अतः कविराजमार्गकारोऽत्र कारिकायां ध्वन्याख्यमपूर्वं कंचनालंकारविशेषमंगीकरोतीत्येव वक्तुं साम्प्रतमिति ।"

मम त्वत्रैवं भाति यत्—विनापि विशिष्टपुस्तकेषु विनिवेशात् ध्वनिमुपदिशन्तिस्म बुधाः आनन्दवर्धनात्पूर्वमित्यभिनवगुप्तोक्त्या आनन्दवर्धनात्पूर्वमेव

आलंकारिकजगति ध्वनिव्यवहारः प्रचलति स्मेति स्पष्टं प्रतीयते। ध्वन्यालोकस्य रचनया ध्वनिप्रस्थान प्रतिष्ठापनश्रेयः परमानन्दवर्धनो भजते । ध्वनेराविष्कारमनु तत्खण्डनमपि (पूर्वपक्षः) उदितं स्यादालंकारिकजगति। अतो युज्यते एव आनन्दवर्धनस्य समकालिकेन कविराजमार्गकारेण व्यञ्जनायाः खण्डनं, ध्वनेश्च अलंकारेषु अन्तर्भावकथनं चेति ।

उपर्युक्तकारिकायां "अर्थेन दूढ्यं" इत्ययं भागः प्रायः सर्वेषामपि विमर्शकानां शिरोवेदनां जनयति । अर्थक्लेशो ह्यत्र बाधते सर्वान् । "ध्वन्यते शब्देन" इत्यत्र उच्चरितं "ध्वन्यते" इतिपदं "शब्देन" इत्यनेनैव केवलमन्वेति – अर्थात् "शब्देन ध्वन्यते" इत्येव केवलमन्वयः । न तु अर्थेन इत्यत्राप्यन्वेति "ध्वन्यते" इति पदमिति केचित् । अत एवैते "अर्थेन" इत्यस्य "अर्थतः" इति रूपं कल्पयित्वा "कमलेऽनिमिषयुगमिति लक्ष्यानुरोधेन च "वाच्यार्थोऽसङ्गतः अत एव दूढ्यः" इति व्याख्यान्ति ।

अत्राप्यहमिदमुचितं पश्यामि यत्–"ध्वन्यते" इति पूर्वोच्चरितं पदं उत्तरत्र "अर्थेन" इत्यत्राप्यन्वेत्येवेति । तथा च अर्थेनापि ध्वन्यते इति मतं दूढ्यमित्यर्थः । तन्त्रेणोच्चरितमत्र "ध्वन्यते" इति पदं "शब्देन" इत्यत्र यथा, तथैव "अर्थेन" इत्यत्राप्यन्वेतीत्येव स्वारसिकी प्रतीतिः । इत्थं च "ध्वनिरित्यलंकारः" इति कविराजमार्गस्य पद्यस्यार्थमहमित्थमुत्प्रेक्षे––

(१) "ध्वनिरित्यलंकारः"

ध्वनिरिति यच्छ्रूयते काव्यतत्वमभिनवं तदपि उक्तेभ्योऽलंकारेभ्यो नातिरिच्यते ।

(२) "ध्वन्यते शब्देन"––

तदपि काव्यतत्वं – उक्तालंकारानतिरिक्तमित्यर्थः–शब्दैरेव – अभिधालक्षणान्यतरवृत्तिद्वारेत्यर्थः–प्रतीयते । न पुनरर्थेनापीति ।

(३) "अर्थेन (ध्वन्यते इति मतं) दूढ्यम्"

अर्थेनाप्यर्थान्तरं ध्वन्यते इति मतं दूढ्यमित्यर्थः। (अर्थेनार्थान्तरस्य ध्वनने हि उपस्थितेनैकेन केनचिदर्थेनान्योऽपि अर्थः कुतो न प्रतीयते ? इति पर्यनुयोगापत्तेः) ध्वनिवादिनो हि व्यञ्जनावृत्त्याश्रयणेन शब्दसहकृतोऽर्थोऽपि अर्थान्तरं ध्वनयतीत्यङ्गीकुर्वन्ति । तदेतन्मतं दूढ्यमिति कविराजमार्गकाराशयः । अर्थाश्रितापीयं व्यञ्जनावृत्तिरिति तु हास्यास्पदमेवेति । अभिधा-लक्षणातिरिक्तायाः शब्दार्थोभयवृत्तेर्व्यञ्जनाख्यायाः प्राचीनैराचार्यैः अनुल्लिखितत्वेन अविश्वसनीयत्वादित्यर्थः ।

(४) "स्मर्तव्योऽयमित्थं"

कमलेऽनिमिषयुगं काशतेतरामित्यादिलक्ष्येषु यथायोग्यं अतिशयोक्त्याद्यन्यतमोऽलंकारः स्मर्तव्यः । अर्थात् यत्र यत्र लक्ष्यविशेषेषु ध्वनिर्ध्वनिरित्याग्रहो ध्वनिवादिनां, तत्र सर्वत्रापि अतिशयोक्ति-समासोक्त्याद्यन्यतमोऽलंकारः समन्वेति इत्यर्थः । कमलेऽनिमिषयुगं काशतेतरामित्यत्राति शयोक्तिरलंकारः। तथा च 'अर्थेन दूढ्यं' इति वचनेन कविराजमार्गकारः व्यञ्जनावृत्तिं दूषयति । स्मर्तव्योऽयमित्थमित्यनेन च "अनुवादोऽयं, न तु ध्वन्याख्यालंकारस्य अपूर्वविधिः" इति ज्ञापयति । अतो नात्र ध्वन्याख्यालंकारान्तराङ्गीकारावकाशः ।

"स्मर्तव्योऽयमित्थमित्यत्र न स्मृतिरूपोऽर्थो ग्राह्यः, अपि तु "कमलेऽनिमिषयुगं काशतेतरां" इति लक्ष्यं ध्वन्यलंकारस्य उदाहरणमिति ज्ञेयमित्येव ग्रन्थकर्तुराशयः" इत्यपि वदन्ति ध्वन्यलंकारवादिनः । परं तु धातोः मुख्यार्थहानापत्तेः तेषामियमुक्तिः कथं संगच्छते ? इति न जानामि । इत्थं च कन्नडविमर्शकैः उत्प्रेक्षितो ध्वन्यलंकारः शशशृङ्गात् नातिरिच्यते इति मदीयोत्प्रेक्षा ।

अपि नाम संस्कृतालंकारिकेषु केनचित्, संस्कृतेतरासां भारतीय भाषाणामालंकारिकेषु वा केनचित् ध्वनिरिति कश्चिदलंकारविशेषो निरूपितो विद्यते क्वचिद्ग्रन्थे ? यदि तथा, तदा तमलंकारं लक्ष्यलक्षणोपन्यासपूर्वकं कविकृतिनामग्राहं च आविष्कुर्वन्तु कृपया जिज्ञासूनामुपकारायेति सर्वानपि भारतीयान् विदुषः साञ्जलिबन्धमभ्यर्थये ।

क्रमागतम्—

चारुचरितामृतबिन्दुः

(हुतात्मनां द्वादशार्यवीराणां संस्कृतपद्यनिबद्धं जीवनचरित्रम्)

श्री हजारीलाल शर्मा (विद्यालंकारः

(१)

आर्ये समाजे बहुलब्धमानः
प्रचारकार्ये प्रथमः प्रधानः
प्रदाय-प्राणान् बलिदानवेद्या
दिवं गतः श्रीयुतलेखरामः ॥

(२)

श्रीमानसौ पञ्चनदीयजेह्लुम्-
सुमण्डले सैदपुरेऽजनिष्ट ।
एकोनविंशे शतके तु पञ्च-
दशोत्तरे विक्रमवत्सरे च ॥

(३)

चैत्राष्टमीके सुदिने सुजन्म
लब्ध्वार्यवीरः सुमनो विभूतिः ।
सारस्वते ब्राह्मणपूतवंशे
परां प्रसिद्धिं समुपेत आर्यः ॥

(४)

उर्दूं सुभाषां प्रपठन् स्वबाल्ये
जातः प्रवीणः प्रियलेखरामः ।
तारुण्यमाप्ते नगरस्य रक्षा—
पदाधिकारीति पदे नियुक्तः ॥

(५)

षट्त्रिंश वर्षे समभूद् विवाहो
लक्ष्मीति देव्या सह पण्डितस्य
स्वधर्मपत्न्या सह वीर आर्य-
सामाजिके कार्यविधौ प्रवृत्तः॥

(६)

समस्तदेशे खलु भारतेऽसौ
धर्मप्रचारार्यवरो भ्रमंश्च ।
ईशामशीयै र्यवनैश्च सार्धं
शास्त्रार्थवादं कुरुते स्म धीरः ॥

(७)

शास्त्रार्थवादे प्रियपण्डितोऽसा
वीशामशीयानथ पारसीयान् ।
ग्रन्थान् चखण्डे निजतीव्रबुद्ध्या
निर्भीकि आर्यः प्रियलेखरामः ॥

(८)

अस्थापयत् श्रीयुतलेखरामः
'पेशावरेऽप्यार्यसमाजसंस्थाम् ।
शुद्धिप्रचारेण चकार हिन्दू-
नीशामशीयान् यवनांस्त्वनेकान् ।

(९)

हा ! हन्त ! चान्ये यवना ह्यनार्या
आर्यं सुवीरं परिहन्तुकामाः ।
चेष्टाः प्रचक्रुर्विविधा मलीनाः
पिपीलिका पश्यति छिद्रमेव ॥

(१०)

हा ! हन्त ! चैकः कपटाभ्युपेत
आर्यं निहन्तुं यवनो निकृष्टः ।
उपासदत् शुद्धिमिषेण धूर्तः
श्रीलेखरामं करुणानिधानम् ॥

(११)

संकेतितो मित्रवरैरनेकैः
श्रीलेखरामश्छलिनि ह्यमुष्मिन् ।
विश्वस्य चासावुपदेशवाणीं
विश्वस्य चासावुपदेशवाणीं
दातुं प्रवृत्तः खलु वामनाय ।।

(१२)

हा चैकदासौ धृतकौक्षिकेय
आर्यं निहन्तुं समुपस्थितोऽभूत् ।
नराधमो हा ! छुरिकां विषाक्तां
श्रीलेखरामोदरमध्यमाधात् ।।

(१३)

हा ! लेखरामोदरमध्यभागा-
च्छस्त्रेण छिन्नाद् रुधिरस्य धारा ।
हा ! हाऽऽलपन्तीं जनतां रुदन्तीं ।।
विस्मामयन्ती वहते स्म वेगात् ।।

(१४)

हा ! हाऽऽततायी प्रियधर्मपत्नी-
मार्यां तदीयामपि संप्रहृत्य
विमोच्य चात्मानमहो द्रुतं हा !
दुद्राव नीचः क्षुरिकां दधानः ।।

(१५)

कृतोपचारेऽपि न रक्तधारा
रुद्धाऽभवद् हन्त ! समाजसेवी ।
हा ! हा ! रुदन्तीं जनतां समस्तां
विहाय यातो दिवमार्यवीरः ।।

(१६)

आर्यैः समस्तैरवरोधनीयं
न लेखकार्यं सततं स्वकीयम् ।
इत्यार्य जातिं प्रति धर्मवीर-
स्यार्यस्य संदेश इयाननघ्यः ।।

गुरुकुल-पत्रिकाविवरणम्

१. प्रकाशनस्थानम्——	कांगड़ीगुरुकुलम्
२. प्रकाशनं कदा भवति——	मासिकी पत्रिका
३. स्वामिनी समितिः——	गुरुकुलकांगड़ीविश्वविद्यालयस्य विद्यासभा
४. सम्पादकस्य नामधेयम्——	श्री भगवद्दत्तो वेदालंकारः
राष्ट्रियता——	भारतीयः
संकेतः——	कांगड़ीगुरुकुलम्
५. प्रकाशकस्य नामधेयम्——	श्री गंगारामः कुलसचिवः
राष्ट्रियता——	भारतीयः
६. मुद्रकस्य नामधेयम्——	श्री सुरेशचन्द्रो वैष्णवः
राष्ट्रियता——	भारतीयः

अहं गंगारामो घोषयामि यदुपरिलिखितं विवरणं मदीयज्ञानविश्वासानुसारं यथार्थं वर्तते ।

ह० गंगारामः कुलसचिवः
गुरुकुल-पत्रिकाप्रकाशकः

सम्पादकीय टिप्पण्यः

उदारचरितानां तु वसुधैव कुटुम्बकम्

अस्मिन् संसारे ये उदारचरिताः पुरुषा विद्यन्ते-तेऽहंकारजन्यानां क्षुद्रवृत्तीनां पाशबद्धा न भवन्ति। अहं ममेत्यादि ममत्वप्रायाणां शब्दानाँ कोलाहलस्तेषां मुखान्न कदापि श्रूयते। अयं मम परिवारः, इमे मे ज्ञातयः, इमे च मे बन्धुबान्धवाः, इमे पौरस्त्याः, उत्तरास्थाः, इमे च दाक्षिणात्याः, अयं हिन्दुः, अयं मुसलमानः, क्रिश्चियनो वा सिक्खोवा। अयं पञ्जाबी, अयं च बङ्गाली, मद्रासी, महाराष्ट्रीयः, एवमेव संकीर्णताद्योतकान् शब्दान् देशादिपरिधीन् वा उररीकृत्य न ते कदापि भाषन्ते। सर्वे एते भारतीया भारतमातुः पुत्रा इति तेषां विचारसरणिः भवति। तेषामादर्शस्तोत्र भवति—"माता भूमिः पुत्रोऽहं पृथिव्याः" इति ऋचाभ्युक्तं तथ्यं सदा ते मन्वते। मनसा वाचा कर्मणा तथाऽऽचरन्ति। अण्वपि मनस्तेषां व्यापनशीलं भवति। पुरा भारतवर्षे बहव उदारचरिता लोकोत्तरपुरुषाः संजाताः। परमधुना त्वहंकारजन्यैर्बहुभिः परिधिभिर्निगडितोऽयं देशः स्वतन्त्रतावाप्त्यनन्तरमपि महतीं दुःखसन्ततिमावहति। प्रदेशीयनिर्वाचनप्रसङ्गे जातिदोषः सम्मुखमभ्युपेत्य भाति यदहं त्वज्जातीयोऽतस्तव वोटस्तु मदर्थमेव भविष्यति नाम नूनम्। सर्वकारादि नियुक्तिप्रसङ्गेऽप्यसावेव दोषो यथा तथा परोक्षद्वारेण तत्र प्रवेशं लभते योग्यताया न तत्र स्थानम् साचार्द्धचन्द्रं दत्वा बहिर्निस्सारितेति मन्तव्यम्। परोपकाराय सतां विभूतय इत्युक्तिरुदारचरिते पुरुषे गतार्था जायते। महर्षिदयानन्दप्रयत्नेन यो जातिदोषः उच्छिन्नतां गत आसीत् स राजनीतिमलावलिप्तानां स्वार्थपरायणानां प्रयत्नेन पुनः जनि लेभे। अन्यच्च, अधुना भारते धनेन भागवतस्थानं लब्धम्। तस्य सञ्चये व्यये च अहं ममेति वृत्तिकर्षिताऽभूतपूर्वानुदारता सर्वत्र प्रसृताऽऽस्ते। अन्ये च बहवोऽतिकृपणाः स्वभावलुब्धा उचितानुचितमविगणय्य येन केनाप्युपायेनार्थसञ्चयपरा धनराक्षसा अस्मिन्देशे समुत्पन्ना ये धर्माय, याचकाय तथाऽन्यस्मै परोपकारकार्याय न कदाप्यर्पयन्ति स्वीयानि धनानि। दृढतरनिबद्धमुष्टयोऽतितीव्राहंकारनिगडिता दानं त्यागं वा न गणयन्ति। केनापि कविना साधूक्तम्—

> दानेन भूतानि वशीभवन्ति,
> दानेन वैराण्यपि यान्ति नाशम्।
> परोऽपि बन्धुत्वमुपैति दानै,
> र्दानं हि सर्वव्यसनानि हन्ति॥

न केवलं स्वकीयकुटुम्बेभ्यः स्वबन्धुबान्धवेभ्य एव वित्तस्य व्ययो विधातव्यः। परमेतन्मनसि निधाय यत् पृथिव्यां सर्वप्राणिनो मम बान्धवाः सन्ति। अस्मिन् जन्मनि त्वेते वर्तमाना बान्धवाः सन्ति, गतजन्मनि अन्ये आसन् भाविजन्मनि चान्ये एव भविष्यन्तीत्येवं सर्वप्राणिबन्धुभावनाभावितान्तःकरणाः सन्तो मनुष्या अस्माकं वसुधैव कुटुम्बकमिति मंस्यन्ते। उदारं च तेषां चरित्रं भविष्यति। वेदेऽपि निगदितम्—

> जनं बिभ्रती बहुधा विवाचसं नानाधर्माणं पृथिवी यथौकसम्।

विविधभाषाभाषिणं नानाधर्मधारिणं जनसमुदायं बिभर्त्येषा पृथिवी परिवारभावनयेति।

गुरुकुले स्वामिवर्ययोरपूर्वाभिनन्दनम्

१६७३ तमे दिसम्बरमासस्य २३तमतारिकायां बहुवर्षानन्तरं चण्डीगढ़न्यायालयस्यादेशेन तस्यैव छत्रच्छायायां पञ्जाबार्यप्रतिनिधिसभाया निर्वाचनमभूत्। आर्या अपि न्यायालये गच्छन्तीति महत्लज्जास्पदम्। अस्तु! निर्वाचनं जातम्। तत्र बहुमतेन युवा संन्यासी तत्रभवान् इन्द्रवेशः प्रधानपदमलञ्चकार। वयमस्य संन्यासिवर्यस्याभिनन्दनं कुर्मः। अयं संन्यासी युवा तस्य सहयोगी अपरः कर्मठो दृढ़प्रतिज्ञः प्राज्ञः अग्निवेशोऽपि युवा संन्यासी विद्यते। अत्र वयं निःसंशयं ब्रूमो यत् निर्वाचनप्रसङ्गे सम्प्राप्तो विजयस्त्वतीव गौणः। सर्वातिशायी सर्वाधिकं महत्त्वशाली विजयस्त्वस्मिन् कामक्रोधादिवासनापरिप्लुते संसारे सर्वविधवासनानामेव भवति।

आभ्यां यौवन एव कण्टकाकीर्णः दयानन्दीयः पन्था अवलम्बितः। अतो नतमस्तका वयं तौ प्रणोनुमः। निर्वाचनानन्तरं द्वावेतौ संन्यासिनौ तथा गुरुकुलीयोपप्रधानः श्री पृथ्वी सिंह आजादः, श्रीसत्यदेवो विद्यालंकारश्च गुरुकुले समायाताः। अत्रैषामभूतपूर्वाभिनन्दनं गुरुकुलीयाधिकारिभिस्तथान्यैः कर्मचारिभिर्विहितम्। गुरुकुलस्योन्नतिविषये तैः स्वभाषणेषु हृद्गतोद्गारः प्रकटीकृतः। गुरुकुले किं किं परिवर्तनं तैश्चिन्तितमिति भविष्यगर्भे निहितम्। वयमेतद् ब्रूमो यत् त्यक्तपुत्रवित्तैषणमपि विद्वांसं लोकैषणा गर्ते पातयति। "सत्यं वै देवा अनृतं मनुष्याः" इति अनृतप्रायैर्मनुष्यैः प्रदत्तां कीर्तिं न कामयन्ते त्यक्तसर्वपरिग्रहा विवेकिनोऽग्निपुरुषाः। गगनविहारिभिः सिद्धैर्देवैर्ऋषिभिर्यत् सत्यमवितथं प्रकटीकृतं तदेवानुसरन्ति। वयं पुनस्तेषामभिनन्दनं कुर्मः।

साहित्य समीक्षा

संस्कृत व्याकरण शास्त्र का इतिहास

(१म, २य तथा ३य भाग)

लेखकः—श्री पं. युधिष्ठिरो मीमांसकः

प्रकाशकः—रामलाल कपूर ट्रस्ट, बहालगढ़, जिला सोनीपत (हरयाणा)

मूल्यम् ६०) भागत्रयस्य

पदवाक्यप्रमाणज्ञानां पण्डितप्रवराणां महाविदुषां श्री पं. युधिष्ठिरमीमांसकमहोदयानां त्रिषु भागेषु विभक्तं हिन्दीभाषायामुपनिबद्धं "संस्कृतव्याकरण शास्त्र का इतिहासेति" नामकं पुस्तकत्रयमस्य महाभागस्यैतिह्यक्षेत्रेऽपि महावैदुष्यं व्यनक्ति। प्रथमभागस्येदं संशोधितं परिवर्तितं परिवर्द्धितं च तृतीयं संस्करणं विद्यते। एवमेव द्वितीयभागस्यापि संशोधितं परिवर्तितं परिवर्धितं च द्वितीयं संस्करणं तथा तृतीयभागस्य प्रथममेव संस्करणमधुना प्रकाशितम्। एषां त्रयाणां भागानां मूल्यं षष्टिरूप्यकम्। काऽपि भाषा-कूटस्था स्थिरा वा न भवति प्रत्युत सततप्रवाहमयी जायते। अतः परिवर्तनं तत्र स्वाभाविकं जायते। केचन शब्दा विलुप्यन्तेऽन्ये आविर्भवन्ति, शब्देषु विकारोऽर्थपरिवर्तनं वा जायते। परं संस्कृत-भाषायां तु मुख्यतः ह्रास एव विलोक्यते तत्र हेतु-र्बुद्धिमालिन्यं मनुष्याणां स्मृतिसंकोचो ह्रासापत्तिर्वा। ये पूर्वं जनतासु प्रसृता आसन् ह्रासवशात् तेऽधुना न श्रूयन्ते। तेषां कथञ्चित् स्थायित्वे व्याकरणमेवैकं साधनम्। संस्कृतभाषाया व्याकरणस्य तु नैक-विधानि प्रयोजनानि महाभाष्ये पतञ्जलिमुनिना प्रदर्शितानि सन्ति। ये केचन विद्वांस एवं प्रत्यवति-ष्ठन्ते यत् अपाणिनीयप्रयोगा असाधवस्तेऽस्य विदुषो मते न समीचीनदर्शिनः, यथोत्तरं मुनीनां प्रामाण्यमित्यस्यापि तथाऽन्येषां नैकविधप्रश्नानां यत् समाधानमनेन वैयाकरणदिग्गजेन विहितं अन्यच्च "संस्कृतभाषा की प्रवृत्ति विकास और ह्रास" नामके अध्याये अपाणिनीयप्रयोगाणां,साधुत्व-विचारे नैकशब्दानां मूलप्रकृतिनिर्णये स्वोपज्ञपूर्विका मौलिकी या तर्कशैली प्रयुक्ता तत् पाठं पाठं महान् आनन्दो हार्दपरितोषो वा जायते। अस्मन्मते त्रिषु भागेषु विभक्तं पुस्तकमिदं भारतवर्षस्य सर्वेषु विश्वविद्यालयेषु पाठ्यपुस्तकरूपेणाङ्गीकरणीयम्। वयं पण्डितवर्याणां दीर्घायुष्यं कामयामहे, येन दीर्घकालपर्यन्तं देववाण्याः सेवां कर्तुं समर्थाः भवेयुः।

पारिजात मञ्जरी

लेखकः—श्री जगन्नाथ रिवु, शास्त्री

प्रकाशकः—श्री अवतारकृष्ण रिवु, भट्टयार आलीकदल, श्रीनगर, काश्मीर

मूल्यम् ५)

श्रीमद्भिः पं. जगन्नाथ रिवु शास्त्रिभिः काश्मीरभाषान्तर्गतवाङ्मयस्य कासाञ्चित् सर्वजन-सुलभरचनानामनुवादं विधाय स्वतन्त्ररूपेणापि विलिख्य देववाण्या महती सेवा कृता। पुस्तकस्था बह्व्यः रचनाः पूर्वं गुरुकुलपत्रिकायामपि प्रकाशिता आसन्। अस्मिन् पुस्तके 'अमरनाथ जी की अमर कथा' तथा 'शिव की महानता' इति रचना-द्वयमतिगौरवपूर्णं विद्यते। अत्र भक्तिज्ञानकर्म-योगादीनधिकृत्य रचनाः कृताः सन्ति। पुस्तकमिदं ग्राह्यं सर्वैः पठनीयं च विद्यते।

—०—

दिसम्बर १९७३ अंक से आगे:—

वैदिक संहिताओं में प्रश्नोत्तर-शैली

डा० रामनाथ वेदालंकार

सामवेद के प्रश्नोत्तर

सामवेद में विशेष प्रश्नोत्तर नहीं पाये जाते। तो भी ऐन्द्र पर्व के एक सुन्दर प्रश्नोत्तर का उल्लेख यहां किया जाता है।

क्वा ३ स्य वृषभो युवा तुविग्रीवो अनानतः।
ब्रह्मा कस्तं सपर्यति ॥

साम पू० २.३.७।

"वह वृषभ, युवा, बहुत सी ग्रीवाओं वाला, किसी के आगे न झुकने वाला इन्द्र कहां है? और कौन ज्ञानी उसकी सपर्या करता है?

यहां दो प्रश्न किये हैं। इन्द्र चर्मचक्षुओं से दिखाई नहीं देता, अतएव कई यह कहते हैं कि इन्द्र है ही नहीं,५२ परन्तु आस्तिक लोग निश्चित रूप से उसकी सत्ता बताते हैं तथा कहते हैं कि वह सुखादि की वर्षा करने वाला (वृषभ) है, नित्य तरुण है, बहुत सी ग्रीवाओं वाला अर्थात् बहूपदेष्टा है, किसी से पराजित नहीं होता। उसके विषय में प्रश्न उठाया है कि यदि वह है तो बताओ कहां है? दूसरा प्रश्न यह किया है कि यदि वह है भी तो जो निराकार है, नेत्रों से दीखता नहीं, जिसका त्वचा से स्पर्श नहीं होता, जो श्रोत्र से सुनाई नहीं देता, रसना से जिसका स्वाद नहीं लिया जा सकता, नासिका से जिसे सूंघा नहीं जा सकता, ऐसे देव की सपर्या भला कौन कर सकता है। दोनों प्रश्नों का एक साथ ही श्लिष्ट वाणी में उत्तर दिया गया है—

उपह्वरे गिरीणां संगमे च नदीनाम्।
धिया विप्रो अजायत ॥

साम पू० २.३.८

"पर्वतों के एकान्त प्रदेश में तथा नदियों के संगम पर वह रहता है, अर्थात् उसकी अनुभूति करने के लिए ऐसे शान्त, पवित्र वातावरण की आवश्यकता है। द्वितीय प्रश्न का उत्तर मन्त्र के उत्तरार्ध में दिया गया है कि ध्यान द्वारा जो ज्ञानी हो गया है वही उसकी सपर्या करने योग्य होता है।"

अथर्ववेद के प्रश्नोत्तर

अब हम अथर्ववेद के प्रश्नोत्तर पर दृष्टि-निक्षेप करते हैं।

को नु गौः क एकऋषिः किमु धाम का आशिषः।
यक्षं पृथिव्यामेकवृदेकर्तुः कतमो नु सः ॥
एको गौरेक एकऋषिरेकं धामैकधाशिषः।
यक्षं पृथिव्यामेकवृदेकर्तुर्नातिरिच्यते ॥

अथर्व ८.९.२५,२६

प्रश्न : गौ कौन है? एकऋषि कौन है? धाम क्या है? आशीर्वाद कौन से हैं? पृथिवी पर जो एक ही यक्ष है, वह कौन सा है? एक ऋतु कौन सी है?

उत्तर : एक ही गौ है, एक ही एकऋषि है, एक ही धाम है, एक ही प्रकार के आशीर्वाद होते हैं। यक्ष पृथिवी पर एक ही है। एक ही ऋतु है, अधिक नहीं।

---

५२. नेन्द्रो अस्तीति नेम उ त्व आह क ईं ददर्श कमभिष्टवाम। ऋग् ८.१००.३।

प्रश्न यह था कि गौ कौन है, एकऋषि कौन है आदि। तदनुसार उत्तर में नामोल्लेख होना चाहिये था कि अमुक गौ है, अमुक एकऋषि है। परन्तु स्पष्ट निर्देश न कर वेद उत्तर में केवल इतना संकेत करता है कि गौ, एकऋषि आदि एक-एक ही हैं। शेष उत्तर की पूर्ति प्रश्नकर्ता जिज्ञासु पर ही छोड़ देता है कि वह अपनी बुद्धि को प्रेरित करे और निश्चित उत्तर तक पहुंचे। एक सूत्र यहां पकड़ा दिया गया, अन्य सूत्र वेद में ही इतस्ततः मिल जाते हैं। उन्हें गृहीत कर निश्चित परिणाम पर पहुंच जाना कठिन नहीं है। वेद की यह शिक्षण-शैली कई स्थानों पर मिलती है तथा शिक्षामनोविज्ञान की दृष्टि से विशेष ध्यान देने योग्य है। यहां गो शब्द पुल्लिङ्ग व्यवहृत हुआ है। यह एक गौ अर्थात् वृषभ सूर्य है।५३ यद्यपि इस सौर जगत् में अन्य भी गो या वृषभ हैं, यथा पर्जन्य, अग्नि, बैल पशु आदि, तथापि सर्वप्रमुख वृषभ सूर्य ही है। अध्यात्म में यह वृषभ प्राण होगा, जो शरीररूपी शकट को खींचता है५४। एकऋषि शरीर में आत्मा एवं ब्रह्माण्ड में परमात्मा है। ऋषि का अर्थ द्रष्टा होता है।५५ शरीर में मन, चक्षु, श्रोत्र आदि, राष्ट्र में राजा, अमात्य आदि, ब्रह्माण्ड में सूर्य, चन्द्र, नक्षत्रादि भी यद्यपि ऋषि हैं, किन्तु परम ऋषि आत्मा या परमात्मा ही है। एक धाम मोक्षधाम है, जो अन्य अनेकों लौकिक धामों से श्रेष्ठ है। आशीर्वाद भी एक ही होता है, वह है स्वस्ति का आशीर्वाद।५६ यद्यपि दीर्घायु होने, सौभाग्यवान् होने, तेजस्वी होने, ऐश्वर्यशाली होने आदि के अनन्त आशीर्वाद हो सकते हैं, परन्तु उन सबमें स्वस्ति अन्तर्निहित होता है। यक्ष (पूजनीय) भी पृथिवी पर एक ही है, वह है परमेश्वर। यद्यपि माता, पिता, अतिथि, गुरुजन आदि अनेक पूजनीय हैं, तो भी वह पूजनीयों का भी पूजनीय एवं परम यक्ष है।५७ फिर, एक ही ऋतु है, अधिक नहीं। यह ऋतु संवत्सर है। यद्यपि वेद के अनुसार ऋतुओं की संख्या वर्गीकरणों के भेद से बारह, सात, छः, पांच, चार, तीन, दो, एक और अहोरात्रों की दृष्टि से ३६० या ७२० होती है, तो भी संवत्सररूप एक ऋतु ही प्रधान है।५८ ऐसी सौ ऋतुओं से मनुष्यों का शतसंवत्सर जीवन-यज्ञ बनता है।५९

अथर्ववेद के केनसूक्त (१०.२) में भी कुछ प्रश्नोत्तर मिलते हैं।

---

५३. गौः आदित्यो भवति, निरु. २. १४।

५४. प्राणो हि गौः। शत. ४.३.४.२५। अनड्वान् प्राण उच्यते। अथर्व ११.४.१३।

५५. ऋषिर्दर्शनात्। निरु. २.११।

५६. स्वस्ति गोभ्यो जगते पुरुषेभ्यः अथर्व १.३१.४। स्वयन्तु यजमानाः स्वस्ति, वही ४.१४.५। स्वस्ति न इन्द्रो मघवान् कृणोतु, वही ७.९१.१। कृणोमि ते प्राणापानौ जरां मत्युं दीर्घमायुः स्वस्ति, वही ८.२.११।

५७. महद् यक्षं भुवनस्य मध्ये तपसि क्रान्तं सलिलस्य पृष्ठे। अथर्व १०.७.३८।

५८. द्रष्टव्यः निरु. ४.२७। ऋषभो वा एष ऋतूनां यत् संवत्सरः तै.ब्रा. ३.८.३.३।

५९. द्रष्टव्यः सातवलेकरकृत अथर्ववेदभाष्य में इस प्रश्नोत्तर की व्याख्या।

केन श्रोत्रियमाप्नोति केनेमं परमेष्ठिनम् ।
केनेममग्निं पूरुषः केन संवत्सरं ममे ।।
ब्रह्म श्रोत्रियमाप्नोति ब्रह्मेमं परमेष्ठिनम् ।
ब्रह्मेममग्निं पूरुषो ब्रह्म संवत्सरं ममे ।।
अथर्व १०.२.२०,२१

प्रश्न : किसकी कृपा से पुरुष श्रोत्रिय गुरु को प्राप्त करता है, किसकी कृपा से परमेष्ठी को प्राप्त करता है, किसकी कृपा से अग्नि को प्राप्त करता है, किसकी कृपा से संवत्सर को मापने में समर्थ होता है ?

उत्तर : ब्रह्म की कृपा से ६० पुरुष श्रोत्रिय गुरु को प्राप्त करता है, ब्रह्म की कृपा से परमेष्ठी को प्राप्त करता है, ब्रह्म की कृपा से अग्नि को प्राप्त करता है और ब्रह्म की ही कृपा से संवत्सर को मापने में समर्थ होता है ।

